# Shri Vagmati Sahasranamavali 1000 Names

# श्रीवाग्मतिसहस्रनामावलिः

## Document Information

Text title : Vagmati Sahasranamavali 1000 Names

File name : vAgmatisahasranAmAvaliH.itx

Category : devii, sahasranAmAvalI, stotra, devI, sarasvatI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : Skanda Purana, Himavat Khanda (Nepal based). See corresponding stotram

Latest update : June 10, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2020

*sanskritdocuments.org*

# श्रीवाग्मतिसहस्रनामावलिः

ॐ श्रीवाग्मत्याः सहस्रनामस्तोत्रस्य गायत्रीच्छन्दः ।
वागीश्वरी देवता वाग्भवो बीजं, कामराजः लज्जा कीलकं, शिवगङ्गा
बुद्धिब्रह्मसरस्वतीशक्तिश्चतुर्वर्गसाधने विनियोगः ॥

अथ सहस्रनामावलिः ।
ॐ वाग्मत्यै नमः । वाग्भवायै । वाण्यै । वागीश्वर्यै । वचोवरायै ।
वागीशायै । वरदायै । ब्राह्म्यै । वाग्विभूत्यै । भारत्यै ।
वागीशवल्लभायै । भाषायै । गीरूपायै । वाक्-स्वरूपिण्यै ।
वाग्रूपिण्यै । चैतन्यायै । वाग्वागीश्वरवल्लभायै । वाचोर्मिमालिन्यै ।
वाहायै । अर्वाक्पापोर्मिनाशिन्यै नमः । २०

ॐ वाग्देवेश्वरकण्ठस्थायै नमः । वाग्देव्यै । वाग्मतीश्वरायै ।
वाग्भूतार्णप्रवाहायै । वागैश्वर्यायै । सरस्वत्यै । अणिमायै ।
अरुन्धत्त्यै । अर्द्धायै । अगैश्वर्यावतारिण्यै । अशरीरायै ।
अर्द्धमात्रायै । अन्नरूपायै । अघहारिण्यै । अतिसौम्यायै । अच्युतायै ।
अशोकायै । अर्चितायै । अचलवाहिन्यै । अत्युग्रायै नमः । ४०

ॐ अचलसम्भिन्नायै नमः । अच्छिन्नायै । अच्छिन्नवाहिन्यै ।
आनन्दिन्यै । स्वभक्तानां जीविनां च आत्मान्तस्थायै । आनन्दायै ।
अमृतवर्णाभायै । आद्याननसमुद्भवायै । आनन्दोर्मिप्रवाहायै ।
आपोदेव्यै । पयोमय्यै । आकाशवाहिन्यै । आर्यायै । शर्मणोर्मिणां
आकरायै । इच्छाशक्त्यै । इन्द्राण्यै । इन्दिरायै । हरिवल्लभायै ।
ईप्सितार्थप्रदायै । इन्दवे नमः । ६०

ॐ इङ्गितज्ञायै नमः । शिवप्रियायै । ईश्वर्यै । लोकईशान्यै ।
ईश्वरामोदकारिण्यै । ईशान्यै । शाङ्कर्यै । शान्तायै ।
ईशानमुखसम्भवायै । उग्रास्यायै । उग्ररूपायै । उग्रवरप्रदायै ।
उमायै । उग्रार्द्धाङ्गनिषण्णायै । उग्रशीर्षावतारिण्यै ।

ऊर्ध्वेश्वर्यै । सदोर्ध्वस्थायै । ऊनकिल्बिषकारिण्यै ।
ऊशीरगन्धसुप्रीतायै । ऊःच वरप्रदाग्रण्यै नमः । ८०

ॐ ऊरूपायै नमः । सर्वसंहारे ऊर्ध्वगतिप्रदर्शिन्यै । ऊर्ध्वगायै ।
ऊग्रभार्यायै । ऊर्ध्वस्थानप्रदायिन्यै । ऋग्यजुरथ सामात्मने ।
ऋवर्णायै । ऋद्धिरूपिण्यै । ऋकारायै । दितिरूपायै । ऋणहन्त्र्यै ।
ऋतूत्सवायै । ऋकारमुखसम्भूतायै । ऋवर्णात्मामरप्रसुवे ।
ऌकारसंस्तुतायै । अनेकायै । ऌवर्णसेवित्रे । अरिघ्ने । एकायै ।
एकाररूपायै नमः । १००

ॐ एकारायै नमः । मदनोत्सवायै । एकारस्थायै । समायै । एकास्यायै ।
एकाधारायै । बहुश्रितायै । ऐकारवल्लभायै । ऐन्द्यै । ऐकारायै ।
वामलोचनायै । ऐकारात्मने । अनेकाध्वायै । ऐन्द्रीगणप्रसेवितायै ।
ओङ्कारस्थायै । ओङ्कारायै । ओङ्काराश्रुविभूषणायै ।
ओङ्कारवक्रसम्भूतायै । ओङ्कारपूर्वजप्रियायै ।
और्द्धरेतोऽर्च्चितायै नमः । १२०

ॐ और्व्यै नमः । और्ध्वदेहफलप्रदायै । औत्तानपादसंप्रीतायै ।
और्वासमायै । ऊर्वशीप्रियायै । अम्बिकायै । अम्बालिकायै । अनन्तायै ।
अर्णवाध्वरशीर्षगायै । अङ्कुशधारिण्यै । अम्बायै । अन्नपूर्णायै ।
अन्नकारिण्यै । अः रुद्रवक्रसञ्जातायै । अरूपायै । शिववल्लभायै ।
अप्रोक्तायै । एनसां शास्त्रे । अनङ्गारिविनोदिन्यै । कलाधारायै नमः । १४०

ॐ कलारूपायै नमः । कौमुद्यै । कालभैरव्यै । कमलायै ।
कामिन्यै । काल्यै । कुल्लुकायै । कुसुमप्रियायै । कलावत्यै ।
करालास्यायै । कैलासस्थायै । कलानिधये । कामाख्यायै । कुलकान्तायै ।
कामदायै । कामचारिण्यै । कामधेनवे । कृशाङ्ग्यै । कालिन्द्यै ।
कुञ्जरेश्वर्यै नमः । १६०

ॐ कान्तिकायायै नमः । काञ्चीस्थायै । अलकायै । कूटवाहिन्यै ।
कुलवत्यै । कुटिलाङ्ग्यै । कोटराक्ष्यै । कपालिन्यै । कामेश्वर्यै ।
कङ्काल्यै । कीर्तिदायै । कामसुन्दर्यै । कामार्त्तायै । कामरूपायै ।
करुणायै । कुलदेवतायै । कुलिशाङ्ग्यै । कलायै । काष्ठायै ।
कुमार्यै नमः । १८०

ॐ कमलेक्षणायै नमः । कल्याण्यै । कार्च्चितायै । कान्त्यै ।

कालरात्र्यै । कौशिक्यै । काम्यायै । अलकनन्दायै ।
कुलधर्मप्रकाशिन्यै । कलुषघ्न्यै । कृपास्वच्छायै ।
कृष्णायै । कृष्णसमर्च्चितायै । कान्तकल्लोललोलाढ्यायै ।
कृपाकल्लोलशालिन्यै । खगेश्वर्यै । खरूपायै । खगायै ।
खगेन्द्रवाहिन्यै । खवर्णायै नमः । २००

ॐ खङ्गहस्तायै नमः । खेचर्यै । खेटकायुधायै । खाखोदर्यै ।
खगेन्द्राभायै । खमणिद्युतिशोभनायै । खरदंष्ट्रायै ।
खगास्यायै । खण्डपरशुवल्लभायै । गजास्याम्बायै ।
गुह्येश्यै । गजेन्द्रदशनच्छव्यै । गजचर्मावृतायै ।
अजायायै । गजाननप्रसूतिकायै । गौर्यै । गोदावर्यै । गङ्गायै ।
गन्धर्वगणसेवितायै । गणनीयायै नमः । २२०

ॐ गणाध्यक्षायै नमः । गम्भीरनीरवाहिन्यै । गणमात्रे ।
गान्धार्यै । गगनमणिभूषणायै । गोमत्यै । गगनेशान्यै ।
गिरिजायै । गिरिशप्रियायै । गङ्गार्चितायै । गायत्र्यै । गिरिस्थायै ।
गिरिसम्भवायै । गण्डक्यै । गरुडस्थायै । गोकर्णार्चायै । गौतम्यै ।
घनभक्तिप्रियायै । घोरायै । घनामरप्रसेवितायै नमः । २४०

ॐ घृताचीसेवितायै नमः । घोरायै । घोराग्न्यायै घोरवल्लभायै ।
घनाघनौघघोरास्यायै । घनपापविनाशिन्यै । घनस्वनायै ।
घनायै । घोरायै । घोरतरायै । घनच्छव्यै । ङेश्वर्यै ।
घोरघोषायै । घोरकिल्बिषघातिन्यै । चञ्चलायै । चारुवाहायै ।
चण्डेश्वर्यै । चित्तविते । प्रचण्डायै । चण्डरूपायै ।
चामुण्डायै नमः । २६०

ॐ चतुराननायै नमः । चपलायै । चण्डिकायै । चण्ड्यै ।
षड्वक्रान्तर्न्निवासिन्यै । चारुचारायै । चार्वङ्ग्यै । चतुरायै ।
चारुहासिन्यै । चतुःषष्टिकलायै । चित्रायै । चित्राङ्ग्यै ।
चारुलोचनायै । चारुदेहायै । चतुर्बाहवे । चित्रभानुतनुप्रभायै ।
चन्द्रमायै । चन्द्रभागायै । चैतन्यायै । चक्रधारिण्यै नमः । २८०

ॐ छन्दोरूपायै नमः । छवर्णाभायै । प्रोच्छायाच्छन्नविग्रहायै ।
छायासञ्छन्दितालोकायै । छकारायै । छिन्नविग्रहायै ।
छत्रसञ्छादितायै । स्वच्छायै । लाञ्छनोर्न्मिपयश्छव्यै ।

छन्दोमय्यै । श्रुतिच्छन्दायै । इच्छात्मने । छिन्नसंशयायै ।
जगदानन्दिन्यै । ज्वालायै । जाम्बवत्यर्चितायै । अजितायै ।
जगत्प्रियायै । जितक्रोधायै । जगद्धीरायै नमः । ३००

ॐ जितेन्द्रियायै नमः । जाह्नव्यै । जानक्यै । जाप्यायै । जनन्यै ।
जननन्दिन्यै । जगद्धात्र्यै । जगन्मान्यायै । जन्तुजन्मान्तराश्रितायै ।
जगद्वपवे । जगज्जीवायै । जातवेदसे । अपराजितायै । जयमूर्त्यै ।
ज्जगन्मात्रे । जनस्वान्तनिवासिन्यै । जाम्बूनदप्रवाहायै । जयायै ।
विजयायै । अजयायै नमः । ३२०

ॐ जगज्जीवमय्यै नमः । मात्रे । जयन्त्यै । जगदुच्छ्रितायै ।
जीवेश्वर्यै । जनैश्वर्यायै । जीवेशजनकारीण्यै । झङ्केश्वर्यै ।
झकारात्मने । झङ्कारस्वनवाहिन्यै । झर्झरानिपतन्त्यै ।
झङ्केशार्द्धाङ्गहारिण्यै । झषावतारसुप्रीतायै ।
झषवर्माप्रसेवितायै । झर्झररवसंक्षिप्तायै ।
झकाररूपतोषितायै । अट्टाट्टहासिन्यै । क्रोधात्कोटिकोटितरङ्गिण्यै ।
तटिन्यै । करहाटाढ्यायै नमः । ३४०

ॐ अटवीक्षितिगामिन्यै नमः । हिमकूटतटोद्भूतायै । कूटकटकवाहिन्यै ।
शङ्खताटङ्करम्यास्यायै । निधनोद्यतटङ्किन्यै । पीठेश्वर्यै ।
पीठार्यायै । पीवराम्बुप्रवाहिन्यै । डाकिन्यै । डमरुहस्तायै ।
डकारेशायै । डनादिन्यै । डम्भहन्त्र्यै । भेरुण्डायै । डामरायै ।
डण्डतर्ज्जन्यै । ढरूपायै । ढस्वरायै । ढात्मने ।
भङ्गाढ्यायै नमः । ३६०

ॐ ढण्ढकारिण्यै नमः । ढक्कावाद्यस्वनावीचीदृढधारायै ।
दृढारवायै । प्रणवेश्यै । प्रणम्यार्यायै । नम्यायै ।
प्रणवसम्भवायै । तरङ्गिण्यै । तरङ्गाढ्यायै ।
तन्त्रीतरलगामिन्यै । तामस्यै । तमोरूपायै । तमोगुणायै ।
तमःपरायै । तीरवत्यै । त्रिरूपायै । तुष्ट्यै । तीव्राद्रिघ्ने ।
त्रयायै । तीव्रगायै नमः । ३८०

ॐ तीव्रभङ्ग्यै नमः । तीव्रतोयायै । तपोमय्यै । दुस्तारायै ।
दुस्तरत्रात्रे । तारेश्यै ।ताररूपिण्यै । तारिण्यै । ताररूपायै ।
तरलतरतारिण्यै । तपोनिष्ठायै । त्रिमात्रायै । तपस्विन्यै ।

त्रिलोचनायै । त्रिदिवस्थायै । त्रिधारायै । तारेश्वर्यै ।
त्रिविक्रमायै । त्रिवर्गगामिन्यै । त्रिस्थायै नमः । ४००

ॐ तत्त्वायै नमः । त्रिपुरवासिन्यै । त्रिलोकात्मने । त्रिलोकस्थायै ।
त्रैलोक्यतीर्थनन्दिन्यै । ताटङ्किन्यै । तारस्थायै । तारायै ।
त्रिशूलधारिण्यै । त्रिमूर्त्यै । तरण्यै । तापायै । त्र्यक्षरायै ।
त्रिविधाङ्गिन्यै । तीर्थवन्द्यायै । लसत्तीर्थायै तीर्थराज्यै ।
तीर्थदायै । तिर्थाद्यायै । तीर्थज्येष्ठायै । तीर्थार्यायै नमः । ४२०

ॐ तीर्थवाहिन्यै नमः । तार्क्ष्यस्थायै । तार्क्ष्यवन्द्यायै ।
तार्क्ष्यार्यायै । तार्क्ष्यवाहिन्यै । स्थानस्थायै । स्थण्डिलायै ।
स्थीरायै । स्थाण्वीश्वर्यै । स्थलाश्रितायै । मथुरायै ।
मथुरास्थात्रे । स्थानीयस्थायै । स्थलायै । स्थिरायै । ज्येष्ठायै ।
स्थविरायै । मन्थायै । मैथिल्यै । प्रमथाधिपायै नमः । ४४०

ॐ दुष्कृतघ्न्यै नमः । स्पृहादोग्ध्र्यै । देवमात्रे । दधिप्रभायै ।
देवतायै । देवमूर्त्यै । देवदेवप्रियोत्तमायै । देवदूत्यै ।
दीप्तास्यायै । देवक्यै । दैत्यनाशिन्यै । द्वीपिचर्मावृतायै ।
दाक्ष्यायै । दक्षयज्ञप्रमाथिन्यै । दारिद्र्यनाशिन्यै । दान्तायै ।
दाक्षायण्यै । दुर्गघ्ने । दावाग्निदलनायै । दक्षायै नमः । ४६०

ॐ दिग्वस्त्रायै नमः । द्वादशाननायै । दशभुजायै । दक्षिण्यायै ।
दण्डिन्यै । दण्डवत्प्रियायै । दुरितघ्न्यै । दयायै । दुर्गायै ।
दुराधर्षायै । दिगम्बर्यै । दाहप्रशमन्यै । दीप्तायै ।
दुराराध्यायै । दारुणायै । अष्टादशभुजायै । चण्डायै ।
द्विपत्रवासिन्यै । दयायै । दक्षकन्यायै नमः । ४८०

ॐ द्रवायै नमः । दिव्यायै । दिव्यरूपायै । दरीस्तवायै ।
दिव्यार्चितायै । दिव्याङ्ग्यै । देवसैन्यायै । सुदीप्तिकायै ।
दायिन्यै । द्रव्यरूपायै । दानवघ्न्यै । दयाकरायै । दुर्गरूपायै ।
दुराराध्यायै । दुर्ज्जयायै । दुरतिक्रमायै । देवेश्वर्यै ।
दयाशीलायै । दिव्यमोक्षप्रदायिन्यै । धीरायै नमः । ५००

ॐ धीरप्रवाहायै नमः । धाराप्रवाहिण्यै । सुधायै । धरित्र्यै ।
धारिण्यै । धात्र्यै । धरणीधरप्रवाहिण्यै । धन्यायै ।
धान्यधरायै । धीरायै । धारणायै । धरण्यै । धरायै ।

धाराधराननायै । धैर्यायै । धर्मात्मने । धर्मरूपिण्यै ।
धीरूपायै । धिषणायै । धात्र्यै नमः । ५२०

ॐ धूम्राक्षायै नमः । धर्मविग्रहायै । ध्यानगम्यायै । निशि
ध्येयायै । ध्याननननायै । धराश्रितायै । ध्यानरूपायै । बुधध्यात्रे ।
ध्यानस्थायै । ध्यानरूपिण्यै । ध्यानातीतायै । अमरध्यात्रे ।
ध्यातव्यायै । ध्यानतत्परायै । ध्यानेक्षणायै । धियायै । ध्येयायै ।
ध्यानास्यायै । ध्यानसंश्रितायै । धीरध्यात्रे नमः । ५४०

ॐ धराधानायै नमः । धाराध्येयायै । विधायिन्यै । नन्दिन्यै ।
निराधारायै । निष्कलायै । निर्गुणायै । नद्यै । नीलघनस्वनायै ।
नग्नायै । नानाजातिनिवासिन्यै । नागोपवीतिन्यै । नाट्यानन्दायै ।
नृमुण्डधारिण्यै । नीलघनाभदेहायै । निर्द्वन्द्वायै । नागनायिकायै ।
नागेन्द्रदन्तसङ्काशायै । नरकनाशिन्यै । नयायै नमः । ५६०

ॐ निर्भयायै नमः । निर्भरायै । निष्ठायै । नारायण्यै ।
निरञ्जनायै । निष्ठुरायै । निराकारायै । नारसिंह्यै । नोपमायै ।
निशीथिन्यै । निशाहन्त्र्यै । नानादुःखनिवारिण्यै । निर्मदायै ।
करतोयायै । निष्कलङ्कायै । अघनाशिन्यै । शतद्रुसिन्धुसंवाहायै ।
नित्यानन्दविधायिन्यै । त्रिनयनायै । नृसिंहार्यायै नमः । ५८०

ॐ नानाकारप्रवाहिण्यै नमः । पापघ्न्यै । पावन्यै । पद्मायै ।
पवित्रायै । पद्मपूजितायै । प्रज्ञारूपायै । प्रचण्डायै ।
पद्मस्थायै । पद्मसम्भवायै । पद्माक्ष्यै । पद्मिन्यै ।
प्रीतायै । प्रकटवासिन्यै । परायै । प्रीतिभक्तायै । पश्यन्त्यै ।
परम्ब्रह्मावतारिण्यै । प्रभावत्यै । परात्मने नमः । ६००

ॐ पद्मजायै नमः । परमेश्वर्यै । पातकघ्न्यै । पराशक्त्यै ।
पञ्चम्यै । पञ्चमारुतायै । पञ्चात्मने । पञ्चतत्त्वायै ।
पञ्चत्वस्थायै । परापरायै । पञ्चपीठेश्वर्यै । पूर्णायै ।
पूरकायै । पञ्चमीप्रियायै । पूर्णिमायै । पूर्णरूपायै । पूर्णेश्वर्यै ।
परात्परायै । फणीन्द्रभूषणायै । फेरवे नमः । ६२०

ॐ स्फटिकाभायै नमः । प्रवाहिण्यै । स्फीतायै । स्फोटप्रवाहायै ।
स्नातकस्फोटनाशिन्यै । फणिहारायै । फलाढ्यार्यायै । स्फटिकार्णायै ।
फलप्रदायै । फेरुस्थायै । फेरुरावायै । फेत्कारिण्यै । प्रभायै ।

वैष्णव्यै । वामरूपायै । वामेश्वर्यै । वरप्रदायै । वामस्थायै ।
वाहिन्यै । वामायै नमः । ६४०

ॐ वामेशायै नमः । वामलोचनायै । वरेण्यायै । वरदायै । बालायै ।
वरार्यायै । वरदायिन्यै । विमलायै । विशालाक्ष्यै । विश्वाक्ष्यै ।
विन्दुवासिन्यै । विश्वात्मने । विरूपाक्ष्यै । विभवायै । विन्ध्यवासिन्यै ।
बोधिन्यै । वीरजायै । वीरायै । विश्वयोन्यै । वत्सलायै नमः । ६६०

ॐ विश्वायै नमः । सर्वसुधायै । वीजायै । विशालामृतवाहिन्यै ।
विद्याधर्यै । विद्यात्मने । वैखर्यै । वामकेश्वर्यै । वेदरूपायै ।
वेदान्तायै । वेदाङ्गायै । वेदवल्लभायै । वाराह्यै । वासव्यै ।
वाण्यै । वाराणसीनिवासिन्यै । भवान्यै । भववन्द्यायै । भूमिस्थायै ।
भूमिभूषणायै नमः । ६८०

ॐ भागीरथ्यै नमः । भवाराध्यायै । भवमात्रे । भवेश्वर्यै ।
भयापहायै । भवानन्दायै । भयङ्कर्यै । भयनाशिन्यै ।
प्रभादेव्यै । भगेश्यै । भाविन्यै । भवनाशिन्यै । भक्तिगम्यायै ।
भीतिघ्न्यै । भास्कर्यै । भुवनेश्वर्यै । भक्तिवरप्रदायै ।
भव्यायै । भ्रामर्यै । भगमालिन्यै नमः । ७००

ॐ भक्तितुष्टायै नमः । भेरुण्डायै । भुक्तिदायै । भवतोषिण्यै ।
भावनायै । भुवनेश्यै । भक्तीशायै । भवलोचनायै ।
भास्वद्देहायै । भव्यास्यायै । भावत्यै । भवरञ्जन्यै ।
भूभूषणायै । भूतस्थायै । भूमिभूषणवाहिन्यै । भगवत्यै ।
भवात्मने । भवदुःखप्रभञ्जन्यै । भीमरूपायै ।
भवभ्रान्त्यै नमः । ७२०

ॐ भव्यायै नमः । भव्यार्च्चितान्नायै । भीमादेव्यै । शुभायै ।
भद्रायै । भीमायै । भीमनिनादिन्यै । भूतेश्यै । भूतधात्र्यै ।
भूतस्थायै । भूतभाविन्यै । माहेश्वर्यै । माहामायायै ।
मुञ्जवदद्रिसङ्गमायै । मशेखर्यै । महामार्यै । मान्यायै ।
महेशनन्दिन्यै । महाज्योतिषे । महामेधायै नमः । ७४०

ॐ मायापुरीनिवासिन्यै नमः । मातङ्गिन्यै । मनोरूपायै । महाभूतायै ।
मध्यमायै । मणिपूरकमध्यस्थायै । मोहिन्यै । विश्वमोहिन्यै ।
महाधृतये । महाकाल्यै । मदिरायै । मन्दितानन्नायै । महामतये ।

महासूक्ष्मायै । मधुमत्यै । महोदर्यै । मेनकागर्भजायै ।
मास्थायै । मङ्गलायै । सुमङ्गलायै नमः । ७६०

ॐ मन्दहासायै नमः । महादंष्ट्रायै । मालिकायै । महोमखायै ।
मदालसायै । मनोज्ञायै । मनस्विन्यै । मनोहरायै । मन्दाकिन्यै ।
महाभद्रायै । मोक्षदात्र्यै । माधव्यै । मातरायै । मन्त्ररूपायै ।
मन्वमात्रे । मणिप्रभायै । मुद्राप्रियायै । मेरुस्थायै । मन्त्रात्मिकायै ।
मनोरमायै नमः । ७८०

ॐ मृगेन्द्रादिप्रवाहायै नमः । महेशमुखसम्भवायै । मणिमतये ।
महावेगायै । मणिमुकुटसम्भवायै । याज्ञेयायै । यमुनायै ।
ज्येष्ठायै । यज्ञमात्रे । यशस्विन्यै । यज्ञाङ्ग्यै । यामरूपायै ।
यक्षरूपायै । यशोमय्यै । यज्ञप्रियायै । यज्ञेशायै ।
यज्ञभोक्र्यै । यशःप्रियायै । यशोदागर्भसञ्जातायै ।
यशःपूर्णायै नमः । ८००

ॐ यशोबलायै नमः । यादःप्रसेवितायै । याम्यायै ।
यातुधानप्रपूजितायै । योगसारायै । युगाद्यायै । योगेश्वर्यै ।
अयोनिजायै । योगीशायै । योगरूपायै । योगीन्द्रहृदयाश्रितायै ।
योगिनीसेवितायै । योग्यायै । योगीश्वरायै । युगस्थितायै ।
योगीश्वरास्यसम्भूतायै । योगसिद्धायै । यशोमय्यै । योगोद्भवायै ।
सुयोगार्यायै नमः । ८२०

ॐ योगेन जलवाहिन्यै नमः । रसोत्तमप्रवाहायै । रुद्रहृद्रमणायै ।
रसायै । रावणभूतिदायै । रम्भायै । राजराजेश्वर्यै । वरायै ।
रसवाहायै । रम्भोरवे । रसभोक्र्यै । रसप्रियायै । रागप्रियायै ।
रसज्ञायै । रामायै । राघावतारिण्यै । रमण्यै । राधिकाऽऽराध्यायै ।
राज्यदायै । राज्यराजितायै नमः । ८४०

ॐ राकिण्यै नमः । राज्यभोक्र्यै । रौद्रीनामवरप्रदायै । रोहिण्यै ।
रक्तपद्मस्थायै । रतिज्ञायै । ऋद्धिरूपिण्यै । रुद्रप्रियायै ।
रुद्र्यै । रथस्थायै । रथगामिन्यै । रत्नाङ्ग्यै । रक्तवासायै ।
रक्ताक्ष्यै । रक्तदन्तिकायै । रत्नगृहायै । रत्नस्थायै ।
रत्नपद्माश्रितायै । रसायै । लम्बोदरप्रसूतायै नमः । ८६०

ॐ मृगलाञ्छनशेखरायै नमः । लम्बिकायै । नलिनोल्लासायै ।

लाकिन्यै । ललितायै । अलकायै । ललनायै । ललज्जिह्वायै । ललितायै ।
लोहिताङ्गिन्यै । लम्बोदर्यै । सुलीलाङ्गायै । लोलकल्लोलमालिन्यै ।
लक्ष्म्यै । लक्ष्मीप्रदायै । लक्ष्मायै । लक्षालक्षतरङ्गिण्यै ।
लक्ष्मीरूपायै । लक्ष्मीस्थायै । लक्ष्मीलक्ष्मावधिश्रितायै नमः । ८८०

ॐ वेणवे नमः । वशप्रियायै । ब्राह्म्यै । वल्लकीवाससः प्रियायै ।
बालीशायै । बालिकायै । बालायै । ब्रह्मस्वच्छोर्मिमालिन्यै ।
ब्रह्मस्थायै । ब्रह्मरूपायै । ब्रह्मेश्यै । ब्रह्मपूजितायै ।
ब्रह्मातीतायै । परं ब्राह्म्यै । ब्रह्मेशाच्युतवन्दितायै ।
शिवेश्वर्यै । शिवावाहायै । शाम्भकर्यै । शिवप्रियायै ।
शर्वेश्वर्यै नमः । ९००

ॐ शर्वाण्यै नमः । शान्तायै । शान्तप्रवाहिण्यै । शमनायै ।
शक्त्यै । ऊपायै । शार्ङ्गिण्यै । सर्वमङ्गलायै । शतरुद्रायै ।
शच्यै । शीतायै । शीलायै । शीलप्रदायै । शुभायै । शीलरूपायै ।
सुशीलस्थायै । श्रीरूपायै । श्रीकर्यै । शिवायै ।
श्रीमय्यै नमः । ९२०

ॐ श्रीनिवासायै नमः । श्रीमत्यै । श्रीधरार्चितायै ।
श्रद्धाप्रियायै । सदाश्रद्धायै । श्रद्धात्मने । श्रुतिप्रियायै ।
श्रुतिप्रज्ञायै । शशाङ्काभायै । श्रुतिरूपायै । शुचिस्मितायै ।
श्रुतिन्यै । श्रुतिनेत्रायै । श्रुतिज्ञायै । श्रुतिपूजितायै ।
षद्पत्रपद्ममध्यस्थायै । षद्चक्राधारसंश्रितायै ।
चतुःषष्टिकलोपेतायै । षष्ठस्वर्यै । षडङ्गिन्यै नमः । ९४०

ॐ षडास्यजनन्यै नमः । षष्ठ्यै । षडाननायै । षरुपिण्यै ।
षोडश्यै । षोडशाधारायै । षोडशारनिषङ्गिण्यै ।
साक्षात्सारतरायै । सारायै । सत्त्वस्थायै । सर्ववन्दिन्यै ।
सात्त्विक्यै । सत्त्वरूपायै । सर्वसत्त्वनिवासिन्यै । संसारसारहायै ।
स्वाहायै । सुभङ्गायै । साररूपिण्यै । संवर्त्तान्तायै ।
निमेषादिसंवत्सरावतारिण्यै नमः । ९६०

ॐ सहस्रास्यायै नमः । सहस्राक्षायै । सावित्र्यै । सारदेश्वर्यै ।
सर्वेश्वर्यै । सत्यात्मने । सर्वविद्यायै । साकिन्यै । स्मृतिमय्यै ।
सूर्यात्मने । सर्ववर्णान्तसारिण्यै । सर्वेन्द्रियाश्रितायै । सूक्ष्मायै ।

सर्वेन्द्रियाधिश्यै । वरायै । सिद्धात्मने । सूक्ष्मरूपांशायै ।
सूक्ष्मस्थायै । सोमभूषणायै । सङ्ग्रामजयदायै नमः । ९८०

ॐ साध्व्यै नमः । सृष्टिस्थितिविनाशिन्यै । सर्वेशायै ।
सर्वरोगघ्न्यै । सर्वग्रहविनाशिन्यै । सदसद्रूपिण्यै ।
सत्तायै । स्वस्तिरूपायै । सरस्वत्यै । हृदिन्यै । हरवाग्जातायै ।
हरहासास्यनिःसृतायै । हृत्पद्मवासिन्यै । हृष्टायै ।
ग्रहराक्षसनिग्रहायै । हंसस्थायै । हंसरूपायै । हंसमूर्त्यै ।
हरप्रियायै । हिङ्गुलायै नमः । १०००

ॐ हंसदेव्यै नमः । हाकिन्यै । हरवल्लभायै । हंसेश्वर्यै ।
हकारात्मने । हंसीगत्यै । हासिन्यै । हरवक्रोद्भवायै । हंस्यै ।
हरिवन्द्यायै । हरिप्रियायै । हेमाभायै । हिमवत्पुत्र्यै ।
हिमकोटीतपस्विन्यै । हिमाद्रितुङ्गसानोर्हि पतन्त्यै हिमशीकरायै ।
क्षोणीश्वर्यै । क्षमारूपायै । क्षणदेश्वरशेखरायै ।
क्षीणक्षेमङ्कर्यै । साक्षात्क्षोभिण्यै नमः । १०२०

ॐ क्षितिवाहिन्यै नमः । क्षामोदर्यै । क्षमायै । क्षीणायै ।
यक्षेश्वर्यै । सुदक्षिणायै । क्षेमङ्कर्यै । क्षणाभाङ्ग्यै ।
क्षौमाम्बर्यै । क्षणप्रभायै । क्षेत्रज्ञायै । क्षेमदायै ।
क्षीणायै । अक्षयाक्षेयभृङ्गिण्यै । क्षेत्रस्थायै । क्षेत्रदेहायै ।
मोक्षदायै । क्षीप्रवाहिण्यै नमः । १०३८

इति श्रीस्कन्दपुराणे हिमवत्खण्डे ब्रह्मनारदसंवादे वाग्मतीसहस्रनाम
चतुरशीत्यधिक शततमोऽध्यायः ॥ १८४॥

Proofread by PSA Easwaran

*Shri Vagmati Sahasranamavali 1000 Names*

pdf was typeset on June 12, 2020

Please send corrections to *sanskrit@cheerful.com*